भिक्षाकः, पुं, (भिक्षते इति। भिक्ष+"जल्पभिक्षकुट्टलुण्टवृङः षाकन्।" ३। २।१५५। इति षाकन्।) भिक्षुकः। इति सिद्धान्तकौमुदी ॥

भिक्षाकी, स्त्री, (भिक्षाक+षित्वात् ङीष्।) भिक्षुकी। इति मुग्धबोधव्याकरणम् ॥

भिक्षाचरः, पुं.स्त्री, (भिक्षां चरतीति। भिक्षा+चर+"भिक्षासेनादायेषु च।" ३।२।१७। इति टः।) भिक्षुकः। इति सिद्धान्तकौमुदी ॥ (स्वनामख्यातो भोजनरपतेः पुत्त्रः। यथा, राजतरङ्गिण्याम्। ८। १७।

"राज्ञ्यां विभवमत्यां यं भोजो हर्षनृपात्मजः।
जातं क्षतद्विचित्पुत्त्रानन्तरं गुरुभिः शिशुम्।
आयुष्कामैस्तमावद्वाभथभिक्षाचराभिधम् ॥")

भिक्षाटनं, क्ली, (भिक्षार्थमटनं गमनम्।) भिक्षार्थगमनम्। यथा,—

"अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं हरस्याहृतं
देवेत्थं जगतीतले स्मरहराभावः समुन्मीलति।
गङ्गा वारिधिमम्बरं शशिकला नागाधिपः
क्ष्मातलं
सर्व्वज्ञत्वमधीश्वरत्वमगमत् त्वां माञ्च भिक्षाटनम् ॥"
इत्युद्भटः ॥

भिक्षाशित्वं, क्ली, (भिक्षाशिनो भिक्षुकस्य भावः। भिक्षाशिन्+त्व।) पैशुन्यम्। इति हारावली ॥

भिक्षाशी, [न्] त्रि, (भिक्षां अश्नातीति। अश+णिनिः।) भिक्षुकः। इत्युणादिकोषः ॥ यथा,—
"भिक्षाशी विचरेद्ग्रामं वन्यैर्यदि न जीवति ॥"
इति प्रायश्चित्तविवेकः ॥

भिक्षुः, पुं, (भिक्षणशीलः। भिक्ष याचने+"सनाशंसभिक्ष उः।" ३।२।१६८। इति उः।) ब्रह्मचार्य्याद्याश्रमचतुष्टयान्तर्गतचतुर्थाश्रमी। आश्रमशब्दोऽयं धर्म्मिपरो धर्म्मपरश्च। इति भरतः ॥ तत्पर्य्यायः। परिव्राट् २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ इत्यमरः।२।७।४२॥ परिव्राजकः ६ पराशरी ७ व्रजकः ८। इति शब्दरत्नावली ॥ तस्य धर्म्मो यथा,—

"भिक्षोर्धर्म्मं प्रवक्ष्यामि तन्निबोधत सत्तमाः।
वनाद्गृहाद्वा कृत्वेष्टिं सर्व्ववेदसदक्षिणाम् ॥
प्राजापत्यां तदन्ते तु अग्निमारोप्य चात्मनि।
सर्व्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ॥
सर्व्वारामं परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने नातिलक्षितः ॥
रहिते भिक्षुकैर्ग्रामे याचामात्रमलोलुपः।
भवेत् परमहंसो वा एकदण्डो यमादिमान् ॥
सिद्धयोगस्त्यजन् देहमन्ततत्त्वमिहाप्नुयात्।
योगमभ्यस्य मितभुक् परां सिद्धिमवाप्नुयात् ॥
दातातिथिप्रियो ज्ञानी गृही श्राद्धेऽपि मुच्यते।"
इति गारुड़े १०३ अध्यायः ॥ * ॥

अपि च।
"चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्त्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप!।
चतुर्थमाश्रमस्थानं गच्छेन्निर्द्धूतमत्सरः ॥
त्रैवर्गिकांस्त्यजेत् सर्व्वानारम्भानवनीपते!।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित्।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद् गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये।
तांस्तु दोषान् परित्यज्य परिव्राण्निर्म्ममो भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च मुखे जुहोति।
विप्रस्तु भैक्षोपगतैर्हविर्भि-
श्चिताग्निना स व्रजति स्म लोकान् ॥
मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयति द्विजातिः ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥ * ॥

बुद्धभेदः। इति जटाधरः ॥ श्रावणीक्षुपः। इति राजनिर्घण्टः ॥ कोकिलाक्षः। इति भावप्रकाशः ॥

भिक्षुकः, पुं, स्त्री, (भिक्षुरेव। भिक्षु+स्वार्थे कन्। यद्वा, भिक्षते इति। भिक्ष+उक।) भिक्षोपजीवी। तत्पर्य्यायः। मार्गणः २ याचनकः ३ वनीयकः ४ याचकः ५। इति जटाधरः ॥ अर्थी ६। इत्यमरः ॥ (यथा, मनुः। ३। २४३।
"ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम्।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥"
पारिभाषिकभिक्षुका यथा, अत्रिः।
"ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः।
अध्वगः क्षीणवृत्तिश्च षड़ेते भिक्षुकाः स्मृताः॥")

भिक्षुसंघाटी, स्त्री, (भिक्षुं संघटते इति। भिक्षु+सम्+घट+अण्। गौरादित्वात् ङीष्।) चीवरम्। इति हेमचन्द्रः ॥ यथा, सुश्रुते उत्तरतन्त्रे ३३ अध्याये।
"पुरीषं कौक्कुटं केशांश्चर्म्मसर्पत्वचन्तथा।
जीर्णाञ्च भिक्षुसंघाटीं धूपनायोपकल्पयेत् ॥")

भिण्डः, पुं, (भण्यते इति। भण्+डः। पृषोदरादित्वात् साधुः।) भिण्डाक्षुपः। इति राजनिर्घण्टः ॥

भिण्डकः, (भिण्ड। स्वार्थे कन्।) भिण्डाक्षुपः। इति राजनिर्घण्टः ॥

भिण्डा, स्त्री, (भिण्ड+अजादित्वात् टाप्।) क्षुपविशेषः। भिण्डी इति ख्याता। तत्पर्य्यायः। भिण्डीतकः २ भिण्डः ३ भिण्डकः ४ क्षेत्रसम्भवः ५ चतुष्पदः ६ चतुःपुण्ड्रः ७ सुशाकः ८ अस्रपत्रकः ९ करपर्णः १० वृत्तबीजः ११। अस्या गुणाः। अम्लरसत्वम्। उष्णत्वम्। ग्राहित्वम्। रुचिकरत्वञ्च। इति राजनिर्घण्टः ॥

भिण्डीतकः, पुं, (भिण्डी सती तकति हसतीति। तक्+अच्।) भिण्डावृक्षः। इति राजनिर्घण्टः ॥

भित्तं, क्ली, (भिद्यते स्मेति। भिद्+क्तः। "भित्तं शकलम्।" ८। २। ५९। इति निष्ठातकारस्य नत्वाभावो निपात्यते।) खण्डम्। इत्यमरः। १। ३। १६ ॥

भित्तिः, स्त्री, (भिद्यते इति। भिद्+क्तिन्।) गृहादेर्मृदिष्टकादिमयी वृतिः। काँथ इति भित् इति च ख्याता। तत्पर्य्यायः। कुड्यम् २। इत्यमरः। २। २। ४ ॥ भित्तिका ३ कुड्यम् ४ कुड्यकम् ५। इति शब्दरत्नावली ॥ (यथा, विश्वकर्म्मप्रकाशे। पञ्चमाध्याये।
"मानेनानेन विस्तारो भित्तीनान्तु विधीयते।
पादे पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ॥")
प्रभेदः। सन्धिभागः। अवकाशः। इति विश्वः। प्रदेशः। इति शब्दरत्नावली ॥ (यथा, रघौ। ५। ४३।
"अथोपरिष्टाद् भ्रमरैर्भ्रमद्भिः
प्राक् सूचितान्तःसलिलप्रवेशः।
निर्धौतदानामलगण्डभित्तिः
वन्यः सरित्तो गज उन्ममज्ज ॥")

भित्तिका, स्त्री, (भिद्यते भिनत्ति वेति। भिदिर विदारणे+"कृतिभिदिलतिभ्यः कित्।" उणा०३। १४७। इति तिकन्। कित् स्यात्।) कुड्यम्। इति शब्दरत्नावली ॥ पल्ली। इति हेमचन्द्रः ॥

भित्तिचौरः, पुं, (चोरयतीति। चुर+अच्। चोर एव स्वार्थे अण्। चौरः। भित्त्या कुड्यादिभेदेन चौरः।) चौरविशेषः। सिँदाल चोर इति भाषा। तत्पर्य्यायः। खानिलः २ कुड्यच्छित् ३। इति शब्दरत्नावली ॥

भित्तिपातनः, पुं, (पातयतीति। पत+णिच्। कर्त्तरि ल्युः। भित्तीनां पातनः।) महामूषकः। इति राजनिर्घण्टः ॥

भित्, [द्] स्त्री, (भिद्यते इति। भिद्+"सत्सूद्विषद्रुहदुहयुजविदभिदेति।" ३। २। ६१। इति क्विप्।) प्रभेदः। इति जटाधरः ॥ (भिनत्तीति। भिद्+ताच्छीलादिषु "अन्यतोऽपि दृश्यते।" इति क्विप्।) भेदकर्त्तरि त्रि ॥ (यथा, ऋग्वेदे। ७। १०४। ८।
"भिनत्पुरो न भिदो अदेवीर्नमो वधरदेवस्य पीयोः ॥")

भिद इर् औ ञ ध भिदि। इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट्।) भित् क्रियदवयवविदारणम्। ञ ध भिनत्ति भिन्ते कूलं नदी। औ भेत्ता। इर् अभिदत् अभैत्सीत्। इति दुर्गादासः ॥